**वल्वज** पु० वलते भुवं वेष्टयति वल-क्विप् तादृशः सन् वजति गच्छति वज-अच् । १उलपे तृणभेदे अमरः । (बाबुइ) २वृक्षभेदे स्त्री राजनि० ।

**वल्ह** दीप्तौ चु० उभ०अक०सेट् । वल्हयति अववल्हत् त

**वल्ह** उत्कर्षे भ्वा० आ० सक० सेट् । वल्हते अवल्हिष्ट ।

**वव** पु० वा ड प्रकारे द्वित्वम् । ज्योतिषोक्ते तिथ्यर्द्धात्मके प्रथमे करणे । अस्य ओष्ठ्यादित्वमित्यन्ये ।

**वश** स्पृहायाम् अदा०पर०सक०सेट् । वष्टि उष्टः उशन्ति । अवट् अवाशीत् अवशीत् उवाश ऊशतुः ।

**वश** पुंन० वश-भावे अप्, कर्त्तरि अच् वा । १आयत्तत्वे २प्रभुत्वे च आयत्ते त्रि० शब्दर० ।

**वशंवद** त्रि० वशं वशकरं मधुरं, वशोऽहमिति वा वदति वद-खच् मुम् च । १प्रियवाक्यवादिनि २मधुरवादिनि (तवाहं वशः) इति ३वादिनि च । [करणे ।

**वशक्रिया** स्त्री वशस्य क्रिया करणं कृ-भावे श । वशी-

**वशग** त्रि० वशं गच्छति गम-ड । वशीभूते ।

**वशवर्त्तिन्** त्रि० वशे वर्त्तते वृत-णिनि । वशीभूते ।

**वशा** स्त्री वश-अच् । १वन्ध्यायां २योषायां ३सुतायां ४करिण्यां ५स्त्रीगव्याञ्च मेदि० । अनेन जातेः समासे परनि० गोवशा । [चन्दने स्त्री ।

**वशिक** त्रि० वशोऽस्त्यस्य ठन् । १शून्ये अमरः २अगुरु-

**वशित्व** न० वशिनो भावः त्व । १स्वातन्त्र्ये २ईश्वरस्य ऐश्वर्यभेदे च । तल् । वशिताप्यत्र स्त्री । [स्वतन्त्रे च ।

**वशिन्** त्रि० वशोऽस्त्यस्य इनि । १जितेन्द्रिये २स्वाधीने

**वशिर** न० वश-इरन् । १सामुद्रलवणे अमरः । २गजपिप्पल्याम् ३चव्ये च पु० राजनि० ।

**वशिष्ठ** अतिशयेन वशी इष्ठन् इनेर्लुक् । अतिशयजितेन्द्रियतायुक्ते मुनिभेदे ।

**वशीकरण** न० अवशः वशः क्रियतेऽनेन वश-च्वि-कृ-ल्युट् । तन्त्रादुक्ते वशतासम्पादके मणिमन्त्रादौ ।

**वशीर** पु० वश-ईरन् । गजपिप्पल्याम् जटा० ।

**वश्य** न० वश-यत् ।१लवङ्गे शब्दर०। २आयत्ते त्रि० अमरः

**वष** वधे भ्वा० पर० सक० सेट् । वषति अवषीत् अवाषीत् । ववषतुः ।

**वषट्** अव्य० वह-डषटि । देवोद्देश्यकहविस्त्यागे अमरः ।

**वषट्कार** पु० वषट्+कृ-घञ् । १देवोद्देशकत्यागरूपे यज्ञे २वषडिति करणे यजतिशब्दे कात्या०वाक्यं दृश्यम् ।

**वषट्कृत** त्रि० वषट् इति कृतम् कृ-क्त । हुते अमरः ।

**वष्क** गतौ भ्वा० आत्म० सक० सेट् । वष्कते अवष्किष्ट ।

**वष्कय** पु० वष्क-अयन् । एकहायने वत्से अमरः ।

**वष्कयणी** स्त्री वष्कयमेकहायनवत्सं नयति स्थानान्तरं नी-ड गौरा० ङीष् णत्वम् । चिरप्रसूतायां गवि अमरः । जात्या समासेऽस्य परनि० गोवष्कयणी ।

**वष्कयिणी** स्त्री वष्कय एकहायनो वत्सोऽस्त्यस्या इनि । चिरप्रसूतायां गवि अमरः वष्कयणीति वा पाठः । "वष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः" भावप्र० ।

**वस** स्नेहे छेदने वधे च सक० चु० उभ० सेट् । वासयति ते अवीवसत् त । अधि+गन्धादिनासंस्कारे सक० ।

**वस** स्तम्भे दिवा०पर०सक०सेट् । वस्यति इरित् अवसत् अवासीत् उदित् क्त्वा वेट् ।

**वस** निवासे भ्वा०पर०सक०अनिट् यजा० । वसति अवात्सीत् उवास ऊषतुः उषितः उषित्वा । अधि+अनु+उप-आ+ना वसतेराधारस्य कर्मता अधिवसति वैकुण्ठं हरिः सि०कौ० अनुवसति उपवसति आवसति । उप+ अभोजने तत्र नाधारस्य कर्मता "एकादश्यामुपवसेत्" इत्यादि ।

**वस** आच्छादने अदा० आ० सक० सेट् । वस्ते अवसिष्ट ।

**वस** वासने सुरभीकरणे अद०चु०उभ०सक०सेट् । वसयति ते अववसत् त ।

**वसति(ती)** स्त्री वस-अति वा ङीप् । १वासे २यामिन्याम् "वसतीरुषित्वा" रघुः । ३निकेतने मेदि० ४स्थाने च ५शिविरे सि० कौ० ।

**वसतिवरी** स्त्री ब०व० सोमग्रहणार्थासु अप्सु । "अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरीग्रहणं स्यन्दमानानामनस्तमिते" कात्या० श्रौ० ८।९।७। "सोमार्था आपो वसतीवरीशब्देनोच्यन्ते" कर्क० । अथ सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञानामपां ग्रहणमभिधीयते" वेददी० यजु० ६।२३ ।

**वसन** न० वस-आच्छादने कर्मणि ल्युट् । १वस्त्रे अमरः । भावे ल्युट् । २छादने मेदि० वस-वासे आधारे ल्युट् । ३निवासे ४स्त्रीकटीभूषणे च शब्दर० ।

**वसन्त** पु० वस-झ । मधुमाधवात्मके ऋतुभेदे "मधुश्च माधवश्च वासन्तिकावृतू" यजु श्रुतिः । २अतिसारे शब्दर० ३नाट्ये विदूषकोपाधौ । ४रागभेदे च । "आन्दोलिता च देशाख्या लोला प्रथममञ्जरी । मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः" इत्युक्ता अस्य षष्ठ रागिण्यः षट् इत्यन्ये रागिणीशब्दे दृश्याः ।